महावेदान्ती कालिदासः

–वेम्पटि कुटुम्बशास्त्री

कालिदासीयेषु काव्येषु तत्र-तत्र पद्येष्वद्वैतवेदान्तशास्त्र-सङ्केतमनुसन्दधन् गवेषकः स्थाणुभक्तस्य महाकवेः अद्वैतवेदान्तपक्षपातत्वं व्याकरोति। साक्षात् सन्दर्भाभावेऽपि वेदान्तशास्त्रस्य प्रभावः कालिदासे प्रदर्शयति प्रस्तावः।

यद्यपि "अस्मिन् अतिविचित्रकविपरम्परावाहिनि संसारे कालिदासप्रभृतयः द्वित्राः पञ्चषा वा महाकवयः इति गण्यन्ते" इत्येवम् आचार्यानन्दवर्धनादिभिः प्रस्तुतः महाकविः कालिदासः विद्वत्कवित्वेन न कैश्चिदप्यभिहितः, तथापि तथ्यमेष विद्वत्कविरेव। अयं सत्यवकाशे शास्त्रविषयान् स्पृहन्नपि नोद्वेजयति सहृदयान् अत्यन्तं विरचितेन शास्त्रार्थेन। अत एवैतस्य ग्रन्थेषु अलक्ष्यलक्ष्यं दृश्यन्ते शास्त्रार्थाः। अपि च कवेरस्य सरसपदबन्धेन प्रभाविताः शास्त्रार्थाः स्वीयान् काठिन्यदुरवगाहत्वादीन् गुणान् विहाय काव्यात्मतां भजन्ते। यथा चायं रसपरिपोषणैकदृष्टिः कविः क्वचिदनुक्रान्तमपि शास्त्रार्थं रसविधातुकतया मध्ये विसृजति, तथा उदाहरणेनैकेन निरूप्यते। सारुन्धतयः सप्तर्षयः परमेश्वरान्तिकमुपेत्य तं तमस्तुवन्। अनेकशास्त्रविषयगर्भितस्यास्य स्तोत्रस्यान्ते–

किं येन सृजसि व्यक्तम् उत येन बिभर्षि तत्।
अथ विश्वस्य संहर्ता भागः कतम एष ते॥[१]

इत्यपृच्छन्। एतत्पृच्छाव्याजेन कविः परमेश्वरस्य विश्वात्मकस्य जगज्जन्मस्थितिभङ्गकारण- त्वादिविषयानधिकृत्य किमपि वक्तुमुपक्रान्तः इति स्पष्टमेव। तथापि सुमहानयं विचारः **'जन्माद्यस्य यतः'** इत्यादिवैयासिकशास्त्रविषयः सहृदयानां रसभावनां किञ्चिदिव व्याकुलयेत् इति चिन्तयन्नेव तत्प्रासङ्गिकं परिसमापयति सप्तर्षिमुखात्–

"अथवा सुमहत्येषा प्रार्थना देव तिष्ठतु" इति।

अथ शृङ्गारपरिपोषणैकभाजनं कालिदासः वेदान्तविषयग्रन्थने कथमधिकारी इति प्रश्नः उदेति। समाधीयते। यद्यपि सहृदयहृदयसन्तर्पणायशृङ्गाररसः भूयान् एतेन पोष्यते, तथापि एतस्य काव्येषु आप्रथमाद् अन्तं वेदान्तभावाः रेखामात्रेण नातिस्पष्टं नास्पष्टं प्रदर्श्यन्त एव। तथाहि

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥[२]

इति सगुणौ परमेश्वरौ ध्यायन् कविः वागर्थप्रतिपत्तये इत्यनेन वाक्=उपनिषद्रूपा श्रुतिः, तदर्थः=प्रत्यगभिन्नात्मा, तत्प्रतिपत्तये=तत्साक्षात्काराय, परमेश्वरं नौमि इत्यर्थं व्यञ्जयति। उत्तरेषु सर्गेषु च बहुविधानि सगुणनिर्गुणोपासनानि कृतानि। यथा चायमर्थः तथा उत्तरत्र प्रतिपादियिष्यते। अन्ते च अग्निवर्णेन काव्यं परिसमापितम्। एवं ह्यत्र चिन्तनीयं विद्यते यत् सत्सु बहुषु राजसु दिलीपादिषु श्रीरामादिषु च विख्यातवृत्तेषु अग्निवर्णचरित्रेण विरसावसानं विरचयता महाकविना किन्नु खल्वभिप्रेतं स्यादिति। नातिपरोक्षः अत्र समाधिः। चित्स्वरूपेतरसकलविनाश एव कविना विवक्षितः। नेयं स्वोपज्ञा व्याख्यानपद्धतिः, यावता आनन्दवर्धनाचार्या अपि चतुर्थोद्योते–

"महाभारतेऽपि शास्त्ररूपे काव्यच्छायाऽन्वयिनि वृष्णिपाण्डव-विरसावसानवैमनस्यदायिनीं समाप्तिमुपनिबध्नता महामुनिना वैराग्यजननतात्पर्यं प्राधान्येन स्वप्रबन्धस्य दर्शयता मोक्षलक्षणः पुरुषार्थः, शान्तो रसश्च मुख्यतया विवक्षाविषयत्वेन सूचितः" इत्यादि कथयन्ति।

अपि चाभिज्ञानशाकुन्तले आदौ विश्वात्मकस्य सगुणस्य ईश्वरस्य स्तुतिः कृता, मध्ये च **'विनीतवेषप्रवेश्यानि नाम तपोवनानि, शान्तमिदमाश्रपदं शमप्रधानेषु तपोधनेषु'** इत्यादिना नूनं शृङ्गाररसाविरोधितया शमादीनां प्रस्तावः कृत एव। अपि चात्राभिज्ञानामिदमपरोक्षमेव यत् इतरनाटकसाधारणतयाऽत्र शृङ्गारस्य मुख्य-रसस्य भूमिका शान्तेनारचिता इति, तन्निबन्धनैव शाकुन्तलादुष्यन्तरतौ विलक्षणानन्दातिशयप्रतीतिरिति च।शृङ्गाररसखण्डस्यास्य अन्ते च

'ममापि च क्षपयतु नीललोहितः पुनर्भवं परिगतशक्तिरात्मभूः' इति प्रार्थयमानेन कविना मुमुक्षुत्वं सम्यक् प्रदर्शितमेव।

किञ्च रघौ अजविलापे भोगवैराग्यं साधु प्रतिपादितमेव। तदनन्तरं वशिष्ठः स्वसंदेशे–

मरणं प्रकृतिः शरीरिणां विकृतिर्जीवितमुच्यते बुधैः।
क्षणमप्यवतिष्ठते श्वसन् यदि जन्तुर्ननु लाभवानसौ॥[३]

इति उपदिशन् विषयममुं द्रढयति। अपि च–

'अवगच्छति मूढचेतनः प्रियनाशं हृदि शल्यमर्पितम्, स्थिरधीस्तु तदेव मन्यते कुशलद्वारतया समुद्धृतम्'।

विषयलाभविनाशयोः यथाक्रमं हिताहितसाधनत्वाभिमानः पामराणां विपरीतं तु विपश्चिताम् इति मल्लिनाथः। किञ्च–

स्वशरीरशरीरिणावपि श्रुतसंयोगविपर्ययौ यदा।
विरहः किमिवानुतापयेत् वद बाह्यैः विषयैः विपिश्चतम्॥

तथा च बाह्यविषयवियोगात् दुःखमाप्तुं नार्हसि इत्युपदिशति। तथा च गीतास्वपि–

मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः।
आगमापायिनोऽनित्याः तांस्तितिक्षस्व भारत॥[४]

उपसंहरति चोपदेशम्–

न पृथग्जनवच्छुचो वशं वशिनामुत्तम गन्तुमर्हसि।
द्रुमसानुमतोः किमन्तरं यदि वायावुभयेऽपि ते चलाः॥[५]

एवञ्च महता प्रबन्धेन वेदान्तविषयान् तदुपकरणानि वैराग्यादीनि च आरचयता कविना पठितृभ्यः अनित्यवस्तुवैराग्यरूपः सन्देशः मनसि धृत एव इति निश्चीयते। एवं महाकविरयं साधनचतुष्टयसम्पन्नः अधिकारी इत्यध्यवसीयते। काव्यादर्शे हि कविरात्मानमेव दर्शयति सहृदयेभ्यः।

अपि च–

'वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्'

इति प्रथममेव विरचयता कविना योगान्मोक्षावाप्तिरेव परमं फलं महात्मनामिति प्रकटीकृतम्। अमी हि रघुराजर्षयः यावेगिनां वरा इव आप्रथमं चित्रिताः कविना। सत्स्वपि बहुमुखेषु भोगेषु न ते भोगेच्छया तत्र प्रवर्तन्ते, किन्तु केवलं स्वधर्म इत्यवेक्ष्य, तत्र अनासक्ताः एव धर्मपरिरक्षणाय राज्यं प्राज्यं भुञ्जते। गीताचार्योऽपि –

'तस्माद्युध्यस्व भारत,' 'मुक्तसङ्ग समाचर' इत्याद्यादिशन् फलाकाङ्क्षा-राहित्येन कर्मकरणं प्रस्तौति। निरीहः ज्ञानी सन्नपि लोकसङ्ग्रहार्थं कर्म कुर्यादिति अनुशास्ति। एनमेव निस्पृहत्वं साधु ज्ञापयति कविः रघौ अष्टमे सर्गे–

अथ वीक्ष्य रघुः प्रतिष्ठिमं प्रकृतिष्वात्मजमात्मवत्तया।
विषयेषु विनाशधर्मसु त्रिदिवस्थेष्वपि निस्पृहोऽभवत्।।[६]

अत्र हि भगवती श्रुतिः कर्मचितलोकानामिव पुण्यचितलोकानामपि नाशं बोधयति, 'तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते' इति। क्षत्रियधर्मत्वाद् यावदात्मजन्मनः राज्ये प्रतिष्ठा तावद् राज्यपालनमकार्षीत्। युज्यते चैतत् दिलीपपुत्रस्य। योऽपि–

किमप्यहिंस्यः तव चेन्मतोऽहं यशश्शरीरे भव मे दयालुः।
एकान्तविध्वंसिषु मद्विधानां पिण्डेष्वनास्था किल भौतिकेषु।।[७]

इति नन्दिनीस्थाने आत्मानं मृगराजाय अर्पयितुकामो व्याजहार। नैषा स्थितिः केवलं रघोः यावत्–

गुणवत्सुतरोपितश्रियः परिणामे हि दिलीपवंशजाः।
पदवीं तरुवल्कवाससां प्रयताः संयमिनां प्रपेदिरे।।[८]

एतादृशांश्च राज्ञः वर्णयन् कविः भोगेष्वतृष्णतामसक्ततामुपिदशतीत्युक्ते न किञ्चिदत्रासमञ्जसम्। अत एव 'असक्तः सुखमन्वभूत्' इति असङ्गतिं सुखसाधनं निरूपयति कविः। स रघुः–

स किलाश्रममन्त्यमाश्रितः निसन्नावसभे पुराद्बहिः।
समुपास्यत पुत्रभोग्यया स्नुषयेवाविकृतेन्द्रियः श्रिया।।[९]

अत्र रघुः अविकृतेन्द्रिय इति वर्णितः। अतएव चतुर्थसर्गे 'इन्द्रियार्थनिव रिपून् तत्त्वज्ञानेन संयमी' इति पारसीकान् जेतुं प्रस्थितस्य रघोः संयमी उपमानतया प्रतिपादितः। रघोः उत्तरचरित्रेण प्राक्प्रतिपादितेन च श्लोकेन यावदयं श्लोकः एकवाक्यतां नापाद्येत तावत् संयम्युपमाने कविहृदयं नातिस्पष्टं प्रकाशते।

अथ चैवं वितृष्णस्य अनासक्तस्य च मोक्षप्राप्तये साधनं किमित्याकाङ्क्षायाम् अनुपदमेवाष्टमे सर्गे षोडशतमं श्लोकमारभ्य त्रयोविंशतितमश्लोकपर्यन्तम् अष्टभिः श्लोकैः रघुणा मोक्षावाप्तये कृतां साधनां विवृणोति महाकविः। स्वधर्म इति

लोकसङ्ग्रहार्थञ्च प्रवृत्तिकर्म, तथा स्वश्रेयसे निवृत्तिकर्म, एवम् उभे अपि राजर्षीणां कर्तव्यत्वेन स्थिते। कविरपि एनमेव विषयं द्रढयितुं एष्वष्टसु श्लोकेषु एकैकस्मिन्नपि श्लोके अभ्युदयावपवर्गाभ्यां प्रयतमानयोः साधनप्रकारं हृदयङ्गमं वर्णयति।

मोक्षप्राप्त्यै रघुः प्रथमं सज्जनसङ्गतिं समपादयत्। तदनन्तरं इन्द्रियान् बाह्येभ्यः विषयेभ्यः परिवृत्त्य यमादिगुणसम्पन्ने आत्मनि नियम्य चित्तैकाग्र्यापराभिख्यां धारणां प्राप्तुकामः कुशमयम् आसनम् आददे। 'युक्त आसीत् मत्परः' इति गीतावचनमत्रानुसन्धेयम्।

ततः संचितकर्मणः ज्ञानाग्नी अदहत्–ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा' इति गीतावचनमत्र प्रमाणम्। ज्ञानादेव मोक्षः इति मतं कालिदासस्येत्यपि अस्माच्छ्लोकादवगम्यते। ततश्च सत्त्वरजस्तमआख्यान् त्रीन् गुणान् जित्वा समलोष्टकाञ्चनः अभवत्। एवम् आपरमात्मदर्शनात् सः योगविधेः न विरराम। सिद्धिं चावाप। ततः कश्चित् समाः गमयित्वा तमसः परम् अव्ययम् आत्मस्वरूपानतिरिक्तं पुरुषमाप। अत्र सिद्धिप्राप्त्यनन्तरं काश्चित् समाः गमयित्वा इत्युक्तेः जीवन्मुक्तिरपि अस्य सम्मतेति ज्ञायते।

एवञ्च अवगन्तव्यत्वेन उपगन्तव्यत्वेन च सिद्धे कश्मिंश्चित् पुरुषे तस्य स्वरूपादिषु जायते जिज्ञासा। तत्र ब्रह्मसूत्रेषु पठ्यते 'जन्माद्यस्य यतः'। श्रुतिरपि 'यतो वा इमानि भूतानि जायन्ते 'इत्युपक्रम्य आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते' इत्यादिना आनन्दघनस्य परमात्मनः लक्षणं जगज्जन्मस्थितिभङ्गकारणत्वम् इति बोधयति। कारणत्वं चास्य मुख्यं न सम्भवतीति उपलक्षितम्, तदुपलक्षितशुद्धचित्स्वरूपमेव ब्रह्मणः स्वरूपमित्यन्यदेतत्। एतेनैव लक्षणेन ब्रह्मस्वरूपं बोधयति कविः रघौ दशमे सर्गे–

नमो विश्वसृजे पूर्वं विश्वं तदनु बिभ्रते।
अथ विश्वस्य संहर्त्रे तुभ्यं त्रेधास्थितात्मने॥[१०]

कुमारे द्वितीयसर्गे–

नमस्त्रिमूर्तये तुभ्यं प्राक्सृष्टेः केवलात्मने।
गुणत्रयविभागाय पश्चाद् भेदमुपेयुषे॥[११]

पुनश्च तत्रैव सप्तमे सर्गे–'एकैव बिभिदे त्रिधा सा' इति। एतेन च एकस्यैव परमात्मतत्त्वस्य तत्तदवस्थाभेदेन भेदं परिकल्प्य ततः 'प्राक्सृष्टेः केवलात्मने,'

'त्रेधा स्थितात्मने,' 'एकैव मूर्तिः' इत्यादिना अवस्था-कृतभेदमपनीय शुद्धं स्वरूपं जगज्जन्मस्थितिभङ्गकारणत्वरूपलक्षणेन उपलक्षयति इति स्पष्टमेवात्र प्रतिभाति। उक्तश्चायमर्थः कण्ठरवेणैव कुमारे द्वितीयसर्गे–

तिसृभिस्त्वमवस्थाभिर्महिमानमुदीरयन्।
प्रलयस्थितिसर्गाणाम् एकः कारणतां गतः॥[१२] इति।

अभ्यासिनगृहीतेन मनसा हृदयाश्रयम्।
ज्योतिर्मयं विचिन्वति योगिनस्त्वां विमुक्तये॥[१३] इति।

"योगात्स चान्तः परमात्मसंज्ञं दृष्ट्वा परं ज्योतिरुपाररम" इत्यादिना "स हि देवः परं ज्योतिः" इत्याद्यनेकश्रुतिकटाक्षितं परमात्मनो ज्योतिस्वरूपत्वं प्रकटीकरोति।

अपि च रघौ दशमे

रसान्तराण्येकरसं यथा दिव्यं पयोऽश्नुते।
देशे देशे गुणेष्वेवमवस्थाः त्वमविक्रियः॥[१४]

इत्यनेन उपाधिकृतविकारादिभेदव्यवहारस्य प्रतिभासेऽपि कूटस्थत्वम् अविक्रियत्वं च ब्रह्मणः प्रतिपाद्यते। अत एव च 'स ते दुहितरं साक्षात् साक्षी विश्वस्य कर्मणाम्' इति सर्वकर्मसाक्षित्वं तस्याभिधत्ते। साक्षित्वादेव च जीवात्मगताः दोषाः तदभिन्नेऽपि परमात्मनि न सङ्क्रामन्ति।

एवं सत्यानन्दज्योतिस्वरूपत्वेन लक्षितः परमात्मा किं जीवात्मनः भिन्नः उत नेति विचारणीयं भवति। तत्र कुमारसंभवे तृतीयसर्गे–'मनोवद्वारनिषिद्धवृत्तिवद् हृदि व्यवस्थाप्य समाधिवश्यम्। यमक्षरं क्षेत्रविदोविदुस्तमात्मानमात्मन्यवलोकयन्तम्, – इति उक्तम्। अत्र "अनावृत्तिभयं यस्य परमाहुर्मनीषिणः।" इति। अत्र क्षेत्राभ्यन्तरवर्ती जीव एव स्यात्, तथा च अनावृत्तिभयपदत्वं तस्य नोपपद्यते। यदि च जीवपरमात्मनोः वस्तुतः ऐक्यमभ्युपगम्येत तर्हि विरोधपरिहारः शक्यकार्यः भवति।

निर्गुणस्वरूपस्य उपासना न सम्भवतीति तदर्थं सगुणस्वरूपाकाङ्क्षापि उदेति। तत्र "अष्टाभिर्यस्य कृत्स्नं जगदपि तनुभिः बिभ्रतः" इति 'तनुभिरवतु वस्ताभिरष्टाभिरीशः' इति 'किंकरमष्टमूर्ते' इति च क्रियासमभिहारेण अष्टमूर्तिध्यानं संदृश्यते। "विभुत्वादिभिर्बहुभिर्धर्मैः सदृशमाकाशेन ब्रह्म भवति" इति आकाशाधिकरणीय-भाष्यसम्मत्या अष्टमूर्तिस्वरूपं परमात्मस्वरूपं भूयो विडम्बयतीति, तदुपासनम् इतरेभ्यः

अतिशेते। उपासनान्तराणि च बहूनि तत्र तत्र ग्रन्थेषु नैकवारं कृतान्येव। न त्विह वितन्यन्ते।

कृतमेतेन कालिदाससूक्तिषु वेदान्तभावगवेषणेन। यत्कारणं श्रीमन्तः अमलानन्दाः एतदीयं मेघसन्देशश्लोकमेकं लौकिकस्मृतेः उदाहरणत्वेन दर्शयन्ति। तथा हि ब्रह्मसूत्रेषु पठ्यते–"कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च" इति स्मृतिशब्दस्य कालिदासीया स्मृतिरिति अमलानन्दाः। अत्र स्वर्गादिसाधनैः पुण्यकर्मभिः स्वर्गताः स्वार्गानुभवसमाप्तिसमये किञ्चिदिष्टेन तेनैव पुण्यकर्मणा प्रत्यावर्तन्ते इति एकदेशिनां मतम्। विशालां स्वर्गतुल्यां वर्णयितुकामेन कविना मतमेतदेक-देशिनामाधारीकृत्योत्प्रेक्षितम्–

स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानां
शेषैः पुण्यैः हृतमिव दिवः कान्तिमत्खण्डमेकम्।।[१५] इति।

यद्यप्यत्र सिद्धान्ते एकदेशिनां मतमिदं नाङ्गीकृतं तथापि तन्मतानुरोधेन कालिदासेनेत्थमुत्प्रेक्षणं, तस्य च स्मृतित्वेन सादरं शास्त्रकारैरङ्गीकरणं, कवेरस्य प्रबन्धेषु वेदान्तभावभूयस्त्वं व्यञ्जयत एव।

कथ्यते च विद्वद्भिः यज्जीवन्मुक्तेन उदासीनेन केवलं सर्वे रसाः सर्वात्मना वर्णयितुं शक्यन्ते इति। अतश्च स्वयं जीवन्मुक्तः कालिदासः स्वीयेषु सर्वेषु काव्येषु बहून् वेदान्तविषयान् प्रत्यपादयदिति प्रतिपादितं मया। इदमपि चास्तु–

वेदान्तेषु यामाहुरेकपुरुषं व्याप्य स्थितं रोदसी।
यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षरः।

अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते।
स स्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसायास्तु वः।।[१६]

---

१. कुमारसः ६.२३
२. रघु. १.११
३. रघु. ८.८७
४. श्रीमद्भगवद्गीता २.१४
५. रघु. ८.९०
६. रघु. ८.१०
७. रघु. ८.५७
८. रघु. ८.११

९. रघु. ८.१४
१०. रघु. १०.१६
११. कुमारस. २.१४
१२. कुमारस. २.१६
१३. रघु. १०.२३
१४. रघु. १०.२७
१५. पूर्वमेघ. ३०
१६. विक्रमो १.१